# ধনদাকবচম্

{॥ ধনদাকবচম্ ॥}

দেব্যুবাচ

ধনদা যা মহাবিদ্যা কথিতা ন প্রকাশিতা ।

ইদানীং শ্রোতুমিচ্ছামি কবচং পূর্বসূচিতম্ ॥

শিব উবাচ

শৃণু দেবি প্রবক্ষ্যামি কবচং মংত্রবগ্রহম্ ।

সারাৎসারতরং দেবি কবচং মন্মুখোদিতম্ ॥

ধনদা কবচস্যাস্য কুবের ঋষিরীরিতঃ ।

পংক্তিশ্ছন্দো দেবতা চ ধনদা সিদ্ধিদা সদা ॥

ধর্মার্থকামমোক্ষেষু বিনিযোগঃ প্রকীর্তিতঃ ।

ধং বীজং মে শিরঃ পাতু হ্রীং বীজং মে ললাটকম্ ॥

শ্রী বীজং মে মুখ পাতু রকারং হৃদি মেঽবতু ।

তিকারং পাতু জঠরং প্রিকারং পৃষ্ঠতোঽবতু ।

যেকারং জংঘযোর্যুগ্মে স্বাকারং পাদযোর্যুগে ।

শীর্ষাদিপাদপর্যন্তং হাকারং সর্বতোঽবতু ॥

***Stotram Digitalized By Sanskritdocuments.org***

ইত্যেতৎকথিতং কান্তে কবচং সর্বসিদ্ধিদম্ ।

গুরুভ্যর্চ্য বিধিবত্ কবচং প্রপঠেদ্যদি ॥

শতবর্ষং সহস্রাণাং সহস্রাণাং পূজাযাঃ ফলমাপ্নুযাত্ ।

গুরুপূজাং বিনা দেবি নহি সিদ্ধিঃ প্রজাযতে ॥

গুরুপূজাৎপরো ভূত্বা কবচং প্রপঠেত্ততঃ ।

সর্বসিদ্ধিযুতো ভূত্বা বিচরেদ্ ভৈরবো যথা ॥

প্রাতঃকালে পঠেদ্যস্তু মংত্রজাপপুরঃ সরম্ ।

সোঽভীষ্টফলমাপ্নোতি সত্যং সত্যং ন সংশযঃ ॥

পূজাকালে পঠেদ্যস্তু দেবীং ধ্যাত্বা হৃদম্বুজে ।

ষণ্মাসাভ্যন্তরে সিদ্ধির্নাত্র কার্যা বিচারণা ।

সাযংকালে পঠেদ্যস্তু স শিবো নাত্র সংশযঃ ।

ভূর্জে বিলিখ্ত গুটিকাং স্বর্ণস্থাং ধারযেদ্যদি ॥

পুরুষো দক্ষিণে বাহৌ যোষিদ্বামভুজে তথা ।

দক্ষিণে বাহৌ যোষিদ্বামভুজে তথা ।

সর্বসিদ্ধিযুতী ভূত্বা ধনবান্ পুত্রবান্ ভবেত্ ॥

ইদং কবচম জ্ঞাত্বা যো জপেদ্ধনদাং শুভে ।

শস্ত্রঘাতমবাপ্নোতি সোঽচিরান্মৃত্যুমাপ্নুযাত্ ॥

কবচেনাবৃতো নিত্যং হি যত্রৈব গচ্ছতি ।

তত্রৈব স মহাদেবি সম্পূজ্যো নাত্র সংশযঃ ॥

॥ ইতি ধনদা কবচং সম্পূর্ণম্ ॥

Visit http://www.webdunia.com for additional texts with Hindi meanings.

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Dhanada Kavacham Lyrics in Bengali PDF
% File name : dhanadaakavach.itx
% Category : kavacha
% Location : doc_devii
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : http://www.webdunia.com
% Proofread by : Sridhar - Seshagiri
% Latest update : December 29, 2001
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 15, 2015 ] at Stotram Website